# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – रामानुजवेदान्तः** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – छान्दोग्योपनिषद्** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोरुपरि टिप्पणीं लिखत।**

१ वसुत्वप्राप्तिपूर्वकब्रह्मप्राप्तिः।

२ मधुविद्यासम्प्रदायः।

३ द्वारपुरुषोपासनम्।

४ शाण्डिल्यविद्या।

**प्रश्नः २** आदित्यादौ मध्वादिदृष्टिः यथाग्रन्थं विविच्यताम्।

**प्रश्नः ३** नामरूपकृत्यादिरहितकार्यावस्थारहितादित्यजीवशरीरकब्रह्मण उपासनं यथाभाष्यं निरूपयत।

**प्रश्नः ४** दीर्घापुष्टबालकपुरुषविद्या यथाग्रन्थं प्रतिपाद्यताम्।

**प्रश्नः ५** पुरुषस्य यज्ञसादृश्यं सविशदं निरूप्यताम्।

**प्रश्नः ६ अधोलिखितेषु द्वयोः यथाग्रन्थं व्याख्या कार्या।**

१ मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेत्युभयादिष्टं भवत्यध्यात्मं चाधिदैवतं च॥

२ तं जायमानं घोषा उलूकवोऽनूदतिष्ठन् सर्वाणि च भूतानि सर्वे च कामाः। तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूकवोऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामाः॥

३ स ह क्षत्ताऽन्विष्य नाविदमिति प्रत्ययाय। तं होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्च्छेति॥

४ यतो यत आवर्तते तत् तद्गच्छति मानवः ।
ब्रह्मैवैक ऋत्विक् कुरून् अथाऽभिरक्षति ॥

**प्रश्नः ७** आदित्ये सकलब्रह्मदृष्टिः निरूप्यताम् ।

**प्रश्नः ८** षोडशकलब्रह्मविद्या यथाग्रन्थं प्रतिपाद्यताम् ।

**प्रश्नः ९** गार्हपत्याग्निविद्या सविशदं निरूप्यताम् ।

**प्रश्नः १०** अक्षिपुरुषस्योपासनं यथाग्रन्थं वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ छान्दोग्योपनिषदि श्रीमद्रङ्गरामानुजमुनिना का टीका विरचिता ?
२ एतन्मधुविज्ञानं ब्रह्मा कस्मै उवाच ?
३ वेदस्य नित्यत्वमस्ति उत न ?
४ तृतीयप्रपाठके कति खण्डास्सन्ति ?
५ गायत्रीशब्देन किं प्रोक्तम् ?
६ द्वारपाः इत्यस्य कोऽर्थः ?
७ अरिष्टं कोशमित्यत्र अरिष्टमित्यस्य कोऽर्थः ?
८ कः षोडशं वर्षशतमजीवत् ?
९ पौत्रायणशब्दस्य कोऽर्थः ?
१० जानश्रुतिः कति गवां गृहीत्वा रैक्वं प्रति गतवान् ?
११ रैक्वः कस्मै स्वोपास्यां देवतामुपदिदेश ?
१२ शौनकः कस्य पुत्र आसीत् ?
१३ शौनकोऽभिप्रतारी च कस्मै भिक्षां न दत्तवन्तौ ?
१४ सत्यकामस्य मातुः नाम किम् ?
१५ सुवर्णस्य सन्धानं नाम किम् ?

****